# वैयाकरणनये चैतन्यस्वरूपम्

डॉ. दीक्षितपुष्पा

यद् वेदान्तनये ब्रह्मपदेनाभिधीयते, तदेव व्याकरणनये शब्दपदेन गीयत इति व्याकरणदर्शनमद्वैतसिद्धान्तेभ्यो नातिभिन्नं वर्तते। जाग्रदवस्थाया यो साक्षी स्थूलभुक्, स एव स्वाप्नप्रपञ्चस्य साक्षी प्रविविक्तभुक्, अथ च स एव सुषुप्तिगताज्ञानस्य साक्ष्यानन्दभुगिति, तिसृष्वप्यवस्थासु यन्न विलुप्यते, तदेव नित्यम्। जाग्रदवस्थायामुपलभ्य-मानानामिन्द्रियाणामसत्ता वर्तते स्वप्ने, तथा च स्वप्नावस्थायामुलभ्यमानानामन्तः- करणानामसत्ता वर्तते सुषुप्तावित्यनित्यता बाह्योन्द्रियाणामन्तःकरणानाञ्च। परन्तु सुषुप्तिगताज्ञानमपि यः साक्षात्करोति सुखमहमस्वाप्सं न किञ्चिदवेदिषम् इत्याकारकज्ञानेन, तस्य विलोपो न भवति कदापि, 'नहि द्रष्टुर्दृष्टेः विपरिलोपो भवती' ति श्रुतेस्तस्यैव नित्यत्वम्।

स च विज्ञानात्मात्मसंविदातिरिक्तं न किमपीति को न जानाति। अत्र नास्ति नानात्वं, 'नेह नानास्ति किञ्चन', 'एकमेवाद्वितीयम्', 'न तु तद् द्वितीयमस्ति' 'असङ्गो नहि सज्जते' इत्यादिश्रुतेः।

ज्ञेयभेदाद् बाह्यज्ञानेषु वैविध्यं वर्तते, परन्तु ज्ञेयरहितस्यास्य विशुद्ध-ज्ञानस्यात्मस्व-रूपस्य सजातीयविजातीयस्वगतादिभेदत्रयशून्यत्वमेव। जाग्रत्प्रपञ्चस्य ग्रहणं बाह्येन्द्रियै-र्भवति, स्वाप्नस्य चान्तरिन्द्रियैरिति तेषां पारतन्त्र्यम्, परन्त्वस्यावस्थात्रयस्य साक्षिणो ग्रहणाय नापेक्ष्यते तदतिरिक्तं किञ्चिदपीति स्वयंप्रकाशत्वमस्य। अस्मिन्नेव देशकालवस्तुगताः सर्वाः प्रतीतयः समुल्लसन्ति।

एष प्रत्यक्चैतन्यरूप आत्मा सर्वेषां रूपादिविषयविकल्पानामधिष्ठानरूपेण वर्तमानोऽपि विषयभेदादतीतः। यतः विवर्तदशायां रूपादिविषयाणा-मस्तित्वरूपा भावरूपता स्वाकारेण विवृत्तसद्रूपब्रह्मोपधानादेव न स्वतः, तेन च नानात्वम्।

संवर्तदशायामसताञ्च रूपादिविषयाणामभावरूपता नास्तित्वरूपा ब्रह्मसत्ताकारोपहितस्व-रूपनिषेधरूपत्वात् । तौ च रूपादीनां भावाभावौ ब्रह्मणि दशाभेदेन कल्पितौ, वस्तुतस्तु ब्रह्म तादृशदशाद्वयविनिर्मुक्तमेव । एकस्मिन्नेव ब्रह्मणि कार्यत्वञ्च कारणत्वञ्च, यथाक्रमं विभक्तत्वमविभक्तत्वं चेति सर्वेषु श्रुतिप्रमितवादेष्ववस्थितम् ।

देशकालोपाधिकृतौ क्रमाक्रमावप्यत्र न संभवतः । व्यावहारिकं सत्यं प्रपञ्चरूपं, प्रातिभासिकं च स्वाप्नप्रपञ्चाद्यप्यत्र न सन्ति, अतोऽन्नमयादिकोशेभ्यः पञ्चभ्यः पृथक्करणादेष आत्मा स्वरूपेणैव प्रकाशते ।
अन्तर्यामी स भूतानामाराद् दूरे च दृश्यते ।
सोऽत्यन्तमुक्तो मोक्षाय मुमुक्षुभिरूपास्यते ॥ वा १/१ उद्धरणम्

अयमेव देशकालवस्तुकृतपरिच्छेदत्रयशून्यत्वात्, तिसृष्वप्यवस्था-सूपलभ्यमानत्वात्, त्रिकालाबाधितत्वाच्च वेदान्तिनां सद्वस्तु, उपनिषदां च औपनिषदः पुरूषः, 'तं त्वौपनिषदं पुरुषं पृच्छामी' ति श्रुतेः ।

नास्यात्मसंविदात्मकस्य ज्ञानस्योत्पत्तिविनाशौ संभवतः । 'घट उत्पद्यते' इति घटोत्पत्तिर्ययात्मसंविदा ज्ञायते तयैवात्मसंविदा 'घटो नश्यती' त्यपि ज्ञायते । 'घटोऽस्ति' इति घटसत्ता यया ज्ञायते 'घटो नास्ति' इति घटाभावोऽपि तयैवात्मसंविदा ज्ञायते । इत्थञ्च घट उत्पद्यते, घटो नश्यति, परं ययात्मसंविदा घटस्योत्पत्तिविनाशौ ज्ञायेते तस्या संविद उत्पत्तिविनाशौ न भवतः । सा संवित्तु ज्ञानात्मिकैव । घटमहं जानामि, घटमहं न जानामि, इत्याकारकाणां सर्वेषां ज्ञानानामज्ञानाञ्च प्रत्ययो ज्ञानरूपेणैव भवति। घटस्य नाशेऽपि घटनाशस्य यज्ज्ञानं वर्तते, तस्य नाशो न भवतीति ज्ञानस्याविना-शित्वम्। अतः सृष्ट्यादावपि स्थितादस्मादेव ज्ञानात् सृष्टिर्जायते । महाप्रलयादिषु सर्वेषु प्रलीनेष्वप्येतन्न प्रलीयते । तथा च -

मासाब्दयुगकल्पेषु गतागम्येष्वनेकधा ।
नोदेति नास्तमेत्येका संविदेषा स्वयंप्रभा ॥ पञ्चदशी - १/७

एतावता वेदान्तिनां ज्ञानात्मकं ब्रह्म निरूपितम् । तच्च ब्रह्म शब्दात्मकमिति वैयाकरणाः । इदं ब्रह्मैव वैयाकरणानामात्मचैतन्यमस्ति । इदमेव स्फोटात्मकः शब्दः। इदं ज्ञानस्वरूपं शब्दब्रह्मैव सर्वजगतो बीजम् ।

ननु प्रागुक्तं ब्रह्म सर्वविकल्पातीततत्त्वम् । अधुना तु कथं तद्विपरीतमुच्यते। शब्दतत्त्वमिति ? इति चेन्न । विकाराणां प्रकृत्यन्वयाच्छब्दत्वोपपत्तेः । यथा हि घटकुण्डलादयो विकारा मृत्सुवर्णादिप्रकृत्यन्विता दृश्यन्ते, तथैवैते रूपादयो विषयाः शब्दरुपानुगता दृश्यन्ते । अत एषां प्रकृतिः शब्दतत्त्वमेव । विकाराश्च शब्दैरेव गृह्यन्ते, अत एव ब्रह्मणः शब्दतत्त्वरुपता । ज्ञेयस्य ज्ञानस्य चोपलब्धिः शब्देनैव जायत, इति ब्रह्मणः शब्दतत्त्वरूपता । निर्विकल्पकप्रत्यक्षेऽपि सूक्ष्मशब्दा अनुस्यूताः सन्तीति ब्रह्मणः शब्दतत्त्वरूपता । ज्ञानाकारस्य ज्ञेयाकारेण न स्वरूपगतो भेद, इति ब्रह्मणः शब्दतत्त्वरूपता। तदुक्तम् -

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते । वा १/१२३

ननु भिन्नस्वरूपाणां भिन्नेन्द्रियग्राह्याणाञ्च रूपादीनां कथमभिन्नरूपमभिन्नेन्द्रियग्राह्याञ्च शब्दतत्त्वं प्रकृतिः, उपादानोपादेययोः सारुप्यस्यैवोचितत्वात् इति चेन्न, रूपादीनां भिन्नरूपताया आविद्यकत्वात् "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति श्रुत्या प्रकृतेरेव सत्यत्वलाभात् । किञ्च, शब्देन वस्तु परिच्छिद्यते, अतः प्रकृतिविकृतिभावेन शब्दात्मकं वस्तु । तथाहि - यद्यर्थः शब्दात्मको न भवेत् तदा शाब्दे ज्ञाने न प्रतीयेत, किन्तु शब्देन शब्द एव प्रतीयेत, अन्येनान्यस्य प्रतीत्यसंभवात्, स्वस्यैव स्वप्रतीतिजनकतायाः प्रत्यक्षे दृष्टत्वात् । प्रतीयते च शब्देन अर्थ इति शब्दप्रकृतिकतया शब्दात्मकोऽर्थः । किञ्च, शब्देन विषयविशिष्टं ज्ञानमभिलप्यते, मम घट इति ज्ञानं जातमिति । न चान्येनान्यस्या-भिलापो युक्त इति शब्दात्मकोऽर्थो ज्ञानञ्चेति । किञ्च, सर्वेऽपि स्थितिप्रवृत्तिनिवृत्तिरूपा व्यवहाराः शब्देनैव क्रियन्त इत्यतोऽपि तेषां व्यवहाराणां तद्विषयाणां च मूलभूतं शब्दात्मकं

ब्रह्मैवेत्यतोऽप्यत्र शब्दतत्त्वमित्युक्तिर्ब्रह्मणि युज्यये । अतः शब्दतत्त्वस्यैव रूपाद्यात्मना विवर्तः स्वीकर्तव्यः इति शब्दतत्त्वमेव ब्रह्म । तदुक्तम्।

शब्देष्वाश्रिता शक्तिः विश्वस्यास्य निबन्धनी ।
यन्नेत्रः प्रतिभात्मायं भेदरूपः प्रतीयते ॥ वा. १/११८

अत एव क्वचिदपि भर्तृहरिणा ब्रह्मणोऽभिधानं शब्दब्रह्मपदेन न कृतम् । तन्मते तु यात्मसंविदस्ति सैवात्मचैतन्यं, तच्च शब्दात्मकमेव । यतो ज्ञानं च सर्वविधं शब्दात्मकमेव भवितुमर्हति । तिसृष्वप्यवस्थासु जायमानाः सर्वे प्रत्ययाः निषेधरूपा विधिरूपाश्च ज्ञान एव पर्यवस्यन्ति । ज्ञानञ्चान्तरेण शब्दं न स्फुरति। सर्वेषां प्रत्ययानां निषेधेऽपि ज्ञानस्य निषेधाभावज्ज्ञान-स्यास्याविनाशित्वम् । ज्ञानमेवात्मा । स च शब्दात्मकः । विषयाणां भेदाद् वैषयिकज्ञानेषु वैभिन्नं भवति, किन्त्विदं ज्ञानं विषयाभावादद्वितीयमविनाशि च ।

इदं शब्दरूपज्ञानमेवात्मचैतन्यम् । यथा सर्वेऽनुभवाः शब्दात्मकास्तथैव 'अहमस्मि' इति स्वानुभवरूपं ज्ञानमपि 'अहम्' इति, 'अस्मि' इति पदद्वयेनैव प्रतीयते। अतः सर्वेष्वपि ज्ञानेषु सूक्ष्मशब्दानामनुवेधो भवत्येव । सर्वं ज्ञानमान्तरं बाह्यं च शब्दात्मकमेव सद् भासते। एवञ्च सर्वे अर्था बाह्या आन्तराश्च शब्देनैवावगम्यन्ते । अत एव शब्दोपग्राहिणः । ब्रह्मणो ज्ञानमपि शब्देनैव भवतीति तस्यापि शब्दोपग्राहिता। इत्थञ्च ब्रह्मस्वरूपाणां सर्वेषां ज्ञानानां प्रकृतिः शब्दतत्त्वमेव । आत्यन्तिके विचारे शब्दस्य ब्रह्मणश्च भेदो न लक्ष्यते । अर्थेष्वपि शाब्दिक एव भेदो वर्तते, अत एव सर्वेऽर्थाः शब्दात्मका एव ।

पश्यन्त्यामिमौ शब्दार्थौ लुलित इवैक्यमुपगतौ प्रतीयेते । अत एव भाष्यकारः - कोऽयं शब्दः, कोऽयमर्थः - घट इति शब्दः घट इत्यर्थ, इति । मध्यमायामुभयोः पृथक्प्रतीतिः । परप्रत्ययायने त्वियमेवात्मसंवित् कण्ठताल्वा-दिस्थानानि प्राप्य वैखरीवाग्भवति। अत एव य आत्मा स एव ज्ञानं, यज्ज्ञानं तत् शब्दात्मकम् । इत्थञ्च सर्वेषां ज्ञानानां वाग्रूपता सिध्यति ।

अत एवोक्तं भर्तृहरिणा -

वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती ।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी ॥ वा प. १/१२४

वैयाकरणानां वाग्योगदर्शनेनैवैतत् सर्वमनुगन्तुं शक्यते । ज्ञाने स्वाभाविकी वर्तते वाग्रूपता, यतः सर्वं ज्ञानं सूक्ष्मैः शब्दैरनुविद्धमिव दृश्यते । तेन शब्दानुवेधेनैव ज्ञानमात्मानं प्रकाशयति । तेषां शब्दानामभावे ज्ञानस्य प्रकाशकत्वमपि नाभिव्यज्यते । यथाग्नेः प्रकाशकत्वस्य च तादात्म्यं, तथैव ज्ञानस्य शब्दस्य च । अथवा यथात्मचैतन्यमेवान्तर्यामिपरमात्मनः स्वरूपं, तथैव वाग्रूपता ज्ञानस्येति । जाग्रत्स्वप्नसुषुप्त्यादीनां तिसृणामप्यवस्थानां ज्ञानं वाग्रूपमेव । इयं वागात्मचैतन्यमेव, न तु वागिन्द्रियम् ।

जाग्रदवस्थायां जायमानं प्रत्यक्षं सविल्पकनिर्विकल्पकभेदेन द्विधा । विशेषधर्मपरिग्रहरहिते निर्विकल्पकज्ञानेऽपि 'इदं' 'तद्' इति सर्वनामशब्दाना-मनुवेधो भवत्येव । तदेव ज्ञानं, घटः, पटः, शुक्लः, नील, इत्यादिविकल्पानुगतो नानाशब्दैरेवाभिव्यज्यते ।

स्वप्नावस्थायां भिन्नजातीयेषु पदार्थेषु विज्ञानात्मैव स्वाप्नपदार्थीभूय प्रतीयते । इदं स्वाप्नं ज्ञानमपि शब्दात्मकमेव । परं तत्र शब्दभावनाबीजानि सूक्ष्मवृत्तित्वमुपगतानि भवन्ति । उत्थाने सति जायमानं स्वप्नस्य स्मरणमपि शब्दात्मकमेव ।

असंचेतितावस्थायां सुषुप्तावपि सुखविषयकं, मोहविषयकं वा ज्ञानमविद्यावृत्त्या भवति, 'सुखमहमस्वाप्सं न किञ्चिदवेदिषम्' इति । अनेन स्मरणेन सुषुप्तौ वर्तमानमात्मचैतन्यमेव शब्दरूपेणाभिव्यज्यते ।

इत्थञ्च जाग्रत्स्वप्नसुषुप्त्यादीनां तिसृणामप्यवस्थानां ज्ञानं वाक्तत्त्वोपरक्तमेव । सर्वत्र वर्तमानां स्वभाविकीमिमां वाग्रूपतां विहाय ज्ञानमपि न प्रकाश्येत । इयं ज्ञानस्य वाग्रूपतैव, यदन्तर्जगतो बाह्यजगतश्च बोधः शब्दानुगममन्तरेण न सम्भवतीति । अस्या

वाग्रूपताया बीजानि ऋग्वेदे सन्ति

वायुवत्प्रवहन्ती वागेव विश्वानि भुवनानि रचयति । सर्वे लोकास्तस्मादेव संभवन्ति। सैव विश्वकर्मा ऋषिः । तत एवाविर्भूय जगत् तस्यामेव तिरोभवति।

अहमेव वाता इव प्र वामि आरभमाणा भुवनानि विश्वा ।

ऋग्वेद वाक्सूक्त १०/१२५/२

वाग् वै ब्रह्म । ऐ. ब्रा. ६/३

वाग् वै विश्वकर्मर्षिः । वाज. १३/५८

वाचा हीदं सर्वमिदम् । श. ब्रा. ८/१/२१९

इत्थञ्च वेदे वाक्पदेन परब्रह्मैवाभिधीयते ।

वाग् वै सम्राट् परमं ब्रह्म, नैनं वाग् जहाति ।

अत्रापि वाक्पदेन परब्रह्मैवाभिधीयते । अस्मात् परब्रह्मरूपशब्दादेव जगद्विवर्तत इति वैयाकरणाः।

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।

विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।। वा. १/१

एकस्य तत्त्वादप्रच्युतस्य भेदानुकारेणासत्यविभक्तान्यरूपोपग्राहिता विवर्तः। अथवा अद्वैतस्य वाक्तत्त्वस्य भेदेन प्रतीतिरेव विवर्तः।

शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः ।

छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत ।। वा. १/१२०

इत्यत्रापि परिणामपदेन विवर्त एवाभिधीयते । भगवता शंकराचार्येणाप्यस्मिन्नेवार्थे परिणामशब्दो बहु प्रयुक्तः । अतो जगदिदं वाग्रूपस्य शब्दस्यैव प्रतिभासः ।

तथाहि - ब्रह्मणो यः सर्वभूतविषयाकारेणोत्पत्तिनिधनादिभिर्विविधविकल्पैः परिच्छेदः, सोऽविद्याशक्तिवशात् सत्य इव भासते । न तु सत्या एव तथा विकल्प्यमाना

विषयाः, ब्रह्मणः श्रुतेन कूटस्थनित्यत्वेनोत्पत्तिनिधनादि-रूपसत्यविकल्पासम्भवात्।

ननु यदि विवर्तदशायां प्रतीयमाना विषया न सत्यास्तदा कुतस्तत्प्रतीतिरिति चेन्न, अनादौ संसारे यद् अभूद्, भवति, भविष्यतीत्यादिरूपं कालभेददर्शनं तदभ्याससञ्जातसंस्काराणां परिपाकवशात् कालोपाधिकस्तादृशः सर्वोऽपि व्यवहारः, न तु गवादितत्त्वनिबन्धनः। गवादीनां विषयाणां ब्रह्मणो विवर्तभूतानां ब्रह्मणोऽव्यतिरेके ब्रह्मणो देशकालकृतविभागाभावेन तेषामपि तदभावात् । ब्रह्मणो देशकालकृतविभागाभावश्च ब्रह्मविद आहुः -

"प्रदेशोऽपि ब्रह्मणः सार्वरूप्यमनतिक्रान्तश्च विकल्पश्च इति।"

देशकालभेदेन व्यवहारानुपातिनो धर्मधर्म्यादिभावेन उत्पत्तिनिधनादिभिश्च विकल्प्यमाना विषया एव, न तु तैर्व्यवह्रियमाणमपि ब्रह्म, यतो विवर्तदशायामपि ब्रह्म अनादिनिधनमेव ।

अत एव ब्रह्मणो दशाद्वयी शास्त्रे प्रसिद्धा । एका विद्यायाऽप्रविभागदशाऽपरा चाविद्यया प्रविभागदशा । तत्र यद्यपि प्रविभागदशायां ब्रह्म विविधविकल्पगोचरम्, तथाहि तस्यां दशायामेकस्यैव ब्रह्मणो धर्मधर्म्यादिरूपेण विकल्पः । 'घटोऽभूत्, भवति, भविष्यति' इत्यादिकालभेदेन, भिन्नजाति-पुरस्कारेण च गोघटादिप्रत्ययः, कयोश्चिद् भेदप्रत्ययः कयोश्चिदभेदप्रत्ययः, क्वचिद् भावप्रत्ययः क्वचिदभावप्रत्ययः तथापि कार्यरूपेण प्रविभागाभावदशायां ब्रह्मतत्त्वं तादृशसर्वविकल्पातीतम् । तत्र प्रतीयमानो भेदश्च परावाचोऽतात्त्विकोऽन्यथाभावः । तथाहि -

भेदोत्ग्राहविवर्तेन लब्धाकारपरिग्रहा
आम्नाता सर्वविद्यासु वागेव प्रकृतिः परा ।
एकत्वमनतिक्रान्ता वाङ्नेत्रा वाङ्निबन्धनाः
पृथक् प्रत्यवभासन्ते वाग्विभागा गवादयः ॥ वाक्यपदीप
स्वोपज्ञवृत्ति १/१२६ उद्धरण

वागेव पराप्रकृतिः, परमोपादानमद्वैततत्त्वञ्च । अस्मिन्नद्वैते वाक्तत्त्व एव जगत् घटपटाकारेण भेदेन प्रतीयते । इत्थञ्च शब्दोऽर्थश्च यत्रैकत्वमाप्नुतः सा ज्ञानरूपा सत्तैव शब्दब्रह्म । अतो वेदान्तिनां ब्रह्मैव वैयाकरणानां शब्दः । तत्रेयं भेदप्रतीतिरेव विवर्तः ।

बह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम् ।
विवृत्तं शब्दमात्राभ्यस्तास्वेव प्रविलीयते ॥ वाक्यपदीय
स्वोपज्ञवृत्ति १/१ उद्धरण

शब्दप्रसूतिरिदं जगत् शब्दमात्राभ्य एव विवर्तमानं तत्रैव लयमेति । अतः शब्दतत्त्वमेव ब्रह्म । तस्य च विवर्तावस्था जगत्, संवर्तावस्था च प्रलय इत्युच्यते ।

वागेवार्थं पश्यति वाग्ब्रवीति वागेवार्थं निहितं सन्तानोति ।
वाच्येव विश्वं बहुरूपं निबद्धं तदेतदेकं प्रविभज्योपभुङ्क्ते ॥ वा. स्वोपज्ञवृत्ति
१/११८ उद्धरण

अन्तःस्थितो द्रष्टापि वागेव । वक्तापि सैव । वागेव स्वस्मिन् स्थितं विश्वं प्रसारयति । विभज्य चैनमुपभुनक्ति । बहुरूपं विश्वं वाच्येव निबद्धम् ।

अद्वैतप्रस्थाने ब्रह्म द्रव्यम् । तच्चार्थपदवाच्यम् । तस्माद् विवर्तमानं जगत् शब्दात्मकमर्थात्मकं च । किन्तु व्याकरणदर्शने यद् ब्रह्म, तद् शब्दपदवाच्यम् । तस्माद् विवर्तमानं जगत् शब्दात्मकमर्थात्मकं च । सर्वरूपत्वन्तु सर्वेषां तत्राध्यासात् । सर्वेषां विकल्पानां कल्पितत्वादाश्रयस्यैकत्वाच्चोभयोः प्रस्थानयोर्वस्तुगत्यैकत्वम् । जगदिदं यस्मिन्नध्यस्तं, तद् शब्दात्मकं ब्रह्म एव नामरूपात्मकस्य जगतोऽधिष्ठानम् । जीवात्मापि तस्मादभिन्न एव ।

वागेव विश्वा भुवनानि जज्ञे वाच इत् सर्वममृतं यच्च मर्त्यम् ।
अथदं वाग् बुभुजे वागुवाच पुरुत्रा वाचो न पदं यच्च नाह ॥

पुराणेष्वपीदमेव प्रतिपाद्यते ।

विभज्य बहुधात्मानं सच्छन्दस्यः प्रजापतिः ।

छन्दोमयीभिर्मात्राभिर्बहुधैव विवेश तम् ॥

छन्दोमयः प्रजापतिः छन्दोमयीभिः शब्दवर्णरूपमात्राभिरात्मानं विभज्य जीवो भूत्वा तस्मिन्नेव प्राविशत् । तथा च भर्तृहरिः -

सैषा संसारिणां संज्ञा बहिरन्तश्च वर्तते ।

तन्मात्राप्यतिक्रान्तं चैतन्यं सर्वजातिषु ॥ वा. प. १/१२६

यैषा सर्वप्राणिषु चैतन्यरूपा संज्ञा, यस्यां सत्यां सर्वास्वर्थक्रियासु प्राणिनां प्रवृत्तयः, यदुत्क्रान्तौ च सर्वेषां प्राणिनिकायानां प्रवृत्तिशून्यता सैषा वाग्रूपतैव । अतो योऽयं चैतन्ये वाग्रूपतानुगमस्तेन लोके ससंज्ञो विसंज्ञ इति व्यपदेशः क्रियते । एवं ह्याह

अर्थक्रियासु वाक् सर्वान् समीहयति देहिनः ।

तदुत्क्रान्तौ विसंज्ञोऽयं दृश्यते काष्ठकुड्यवत् ॥

वाक्यपदीय स्वोपज्ञवृत्ति १/१२६ उद्धरण

शिवदृष्टौ सर्वदेहे व्याप्तो रूपविहीनो वागात्मैव द्रष्टा । स एव चित्पदवाच्यः ।

स एवात्मा सर्वदेहव्यापकत्वेन वर्तते ।

अन्तःपश्यदवस्थैव चिद्रूपत्वमरूपकम् ॥

अस्यार्थः - वाग्रूपतानिबद्धं चैतन्यमेव प्राणिनोऽर्थक्रियासु प्रवर्तयति । सर्वा हि प्राणिनामर्थक्रियासु प्रवृत्तयो ज्ञानपूर्विकाः, जानाति इच्छति, यतते चेष्टत इति चेष्टायां क्रमस्वीकारात्। तच्च ज्ञानं वाग्रूपानुविद्धमेव । अत एव वाचैव युक्त नरतिर्यगादयः प्राणिनश्चेष्टन्ते, न तु स्थावरा वृक्षगुल्मलतादयः । यद्यपि वृक्षादिष्वपि वाय्वादिप्रयुक्तः कम्पादिरूपाश्चेष्टाः सन्त्येव, तथाप्यत्र चेष्टापदेन हिताहितप्राप्तिपरिहारानुकूलाः कायक्रिया एव गृह्यन्त इति बोध्यम् ।

गवादिभेदोऽपि परावाक्कर्तृक एव, स एव विवर्तः, सा परावागेव सर्वविद्यासु पराप्रकृतिराम्नाता, उपनिषत्सु हि बह्वयो ब्रह्मविद्या उक्ताः, तासु सर्वासु चेतनं

ब्रह्मैकमेवाद्वितीयं जगतोऽभिन्ननिमित्तोपादानत्वेन श्रुतम् । तच्चैतन्यम् परावाग्रूपमेवं च वाक्चैतन्ययोरभेदः ।

नामैवेदं रूपत्वेन ववृते रूपं चेदं नामभावेऽवतस्थे ।
एके तदेकविभक्तं विभेजुः प्रागेवान्ये भेदरूपं वदन्ति ॥ वाक्यपदीय
स्वोपज्ञवृत्ति/१/१२ उद्धरण

इदं नामरूपात्मकं जगत् शब्दतत्त्वादभिन्नम् । सूक्ष्मवागात्मनान्तःस्थितं नामैव गवाद्यर्थाकारेण रूपत्वेन विवर्तते । रूपं च नामत्वेन व्यवह्रियते । एवं तन्नामरूपं विभागात्प्रागेकं तत्त्वम् । वैयाकरणाः तद् विभागरहितं तत्त्वमेव जागतिकपदार्थेष्ववस्थितं मन्यन्ते । सर्वास्ववस्थासु परिव्याप्तमपीदमवस्थातीतम्। अवस्थातीतत्वाच्च निर्विकारम् । सर्वेषु विकल्पेषु सत्स्वपि विकल्पातीतम् । सर्वेषां भेदानां निमित्तमपि भेदातीतम् । सर्वाः कार्यशक्तयोऽस्मिन्नेव समाविशन्ति। अविद्याशक्त्यास्मिन्नानात्वं विद्यया चेदं निर्विभागम् । कालभेदो मूर्तिभेदश्चाविद्याकृतावेव । क्रियाजन्यपौर्वापर्यमप्यत्र न भवति । मूर्तपदार्थानामायामत्रयमप्यत्र न भवति ।

न चास्योर्ध्वमधस्तिर्यग् वा मूर्तपरिवर्तप्रत्यङ्गानां
क्वचिदवच्छेदकोऽभ्युपगम्यते । वा. स्वो. १/१२

तथा च वेदेऽपि -

नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् ।
म तस्य प्रतिमा अस्ति यस्य नाम महद् यशः ॥ वाज. सं. ३२/
२०३, मै.स. ६/१७, श्वे.उ. ४/१९ ॥

भिन्नत्वेन ज्ञायमाना सर्वे विकारा ब्रह्मरूपेणोपादानेनाद्वैतभावेनान्विताः । न च शब्दं विना विकाराणां ज्ञानं भवितुमर्हतीति, ब्रह्म एव शब्दतत्त्वम् । ज्ञेयं ज्ञानं चोभे अपि शब्देनैवोपलभ्येते । कोऽप्यर्थोऽर्थन न गृह्यते, शब्देन गृह्यत, इति शब्दब्रह्मेति नाम्नोऽन्वर्थता। निर्विकल्पकप्रत्यक्षेऽपि सूक्ष्मशब्दा एवानुस्यूताः सन्तीति शब्दतत्त्वमेव

ब्रह्म । तदेव परावाग्। ज्ञाने नानाकारास्तु ज्ञेयविषयानुपादाय समुद्भवन्ति, न च ते ज्ञानस्यैक्यं विरुध्यन्ति । परब्रह्मरूपे ज्ञाने सर्वे ज्ञानाकारा अपृथग्भूता, अतो ज्ञेयाकाराद् ज्ञानाकारस्य भेदो न तात्त्विकः, यतः सर्वं ज्ञेयं ज्ञानत्वं नातिक्रामति । इत्थञ्च सर्वे शब्दा अर्थाश्च यत्रैकत्वमाप्नुवन्ति, सा ज्ञानरूपा सत्तैव शब्दब्रह्म ।

ज्ञानस्य ब्रह्मरूपता तु वेदान्तदर्शनेऽपि मता, किन्तु वैयाकरणनये ज्ञानमिदं सूक्ष्मशब्दादभिन्नमिति । इदं ज्ञानस्वरूपं शब्दब्रह्मैव सर्वजगतो बीजम् । तदेव भोक्तृत्वं, भोग्यत्वं, भोगत्वं च प्रतिपद्यते ।

एकस्य सर्वबीजस्य यस्य चेयमनेकधा ।
भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः ॥ वाक्यपदीय १/४ ॥

यथा स्वप्ने विज्ञानात्मनि पुरुषे बाह्यतत्त्वं विनैव परस्परविलक्षणा अबहिस्तत्त्वा भोक्तृभोक्तव्यरूपा भोगरूपा ग्रन्थयो विवर्तन्ते, तथैवैकस्य हि ब्रह्मण इयमनुभूयमाना भोक्तृभोक्तव्यरुपेण भोगरूपेण चानेकधा स्थितिर्विवर्तरूपा व्यवहारव्यवस्था । अयं रूपविभागोऽसत्यः, ब्रह्मण्यविरुद्धशक्तिभिर्गाह्यश्च । शक्तय इमा अनिर्वचनीयाः, यतो ब्रह्मरूपेण ब्रह्मेतररूपेण वासां सत्त्वेनासत्त्वेन निरुपणमशक्यम् । ब्रह्मैव ग्रन्थितो ग्रन्थिमतिक्रामति । तेनातिक्रमणेन जायमानाविवर्ता एव भोक्तृभोक्तव्यभोगरूपेण प्रतिभासन्तेऽद्वैततत्त्वञ्च तथैव । इत्थञ्च विवर्तरूपप्रपञ्चोपहितः शब्दात्मा स्फोट एव व्यवहारे जीवः । अयमेवात्मचैतन्यम् । योऽयं दृश्यते नामरूपकृतो भेदः, तस्यायमेव साक्षी, अस्मिन् भेदो मिथ्या । प्रयोक्तुरयमात्मान्तःस्थितसूक्ष्मशब्दात्मक एव । अयमेव वेदस्य महावृषभः ।

चत्वारि श्टङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश ॥

भर्तृहरिणापि महावृषभत्वेनायमेव निरूपितः, तेनैव च सायुज्यमिष्टः । -

अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम् ।
प्राहुर्महान्तमषृभं येन सायुज्यमिष्यते ॥ वाक्यपदीय १/३० ॥

महाभाष्यकारोऽपि -

महता देवेन नः साम्यं यथा स्यात् ।

एतदुक्त्वा शब्दब्रह्मणा सह सायुज्यं व्याकरणाध्ययनं प्रयोजनं निरूपयन्ति। इदं सायुज्यं तु वस्तुतोऽन्तर्यमिरूपेण प्राणिन्यवस्थिते न वाक्तत्त्वेनैवेष्यते । इदं शब्दतत्त्वं ब्रह्मैवाक्षराणां निमित्तत्त्वादक्षरमित्युच्यते, कार्यकारणयोरभेदत्वात्, ज्ञानरूपे प्रत्यगात्मन्यन्तरविद्याया सन्निवेशिताः पदवाक्यरूपा वर्णा एव परप्रत्यायनाय प्रयत्नेनाभिव्यज्यन्त इत्यस्य निमित्तता । वर्णानामियमभिव्यक्तिरेव ब्रह्मरूपात्मनोऽभिष्यन्दः।

सूक्ष्मामर्थेनाप्रविभक्ततत्त्वामेकां वाचनभिष्यन्दमानाम् ।
उतान्ये विदुरन्यामिव च एनां नानारूपामात्मनि सन्निविष्टाम् ॥
वाक्यपदीय १/५ ॥

यथा घटव्यक्तेरुपादानं मृत्तिका तथैव वर्णव्यक्तेरुपादानं ब्रह्म । अतो भर्तृहरिः-

"तत एव हि शब्दाख्यादुपसंहृतक्रमाद् ब्रह्मणः सर्वविकारप्रत्यस्तमये संवर्तनादकृताद् पूर्वं विकारग्रन्थिरूपत्वेनाव्यपदेश्याज्जगदाख्या विकाराः प्रक्रियन्ते"। तथा ह्युक्तम् -

यः सर्वविकल्पानामाभासेऽप्यनवस्थितः ।
तर्कागमानुमानेन बहुधा परिकल्पितः ॥
अन्तर्यामी स भूतानामाराद् दूरे च दृश्यते ।
सोऽत्यन्तमुक्तो मोक्षायं मुमुक्षुभिरुपास्यते ॥ वाक्यपदीय,
स्वोपज्ञवृत्ति १/१

'प्रक्रिया जगतो यतः' इत्यत्र जगत्पदं सकलागमेषु लाक्षणिकं, 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै', इति श्रुतेः । अतो ब्रह्मण उत्पत्तेः प्रागेव वेदाः सन्ति। इदञ्च युक्तिगम्यमप्यस्ति । यतश्चेतनः कोऽपि, ज्ञानपूर्वकमेव करोति ।

यथा कुम्भकारः, दण्डचक्रचीवरादिसामग्रीसम्पादनेन ज्ञानपूर्वकं कुम्भं करोति, तस्य ज्ञाने सूक्ष्मशब्दानामनुवेधो भवति, तथैव ईश्वरोऽपि सर्वज्ञानपूर्वकं सर्वप्रपञ्चं रचयति, तस्य ज्ञानेऽपि सूक्ष्मशब्दानामनुवेधो युक्तः । यतः किमपि ज्ञानं, संकल्पो, विचारो वा सूक्ष्मशब्दं विना न सम्भवति । अतः ईश्वरस्य सृष्टिविज्ञानेऽपि सूक्ष्ममशब्दानामनुवेधः स्वीकर्तव्यः । ते सूक्ष्मशब्दा एव वेदाः । वेदा एवशब्दब्रह्मणः प्रतिबिम्बरूपं सृष्टेः सनातनसंविधानम्। अतश्चास्य शब्दतत्वात्मकस्य ब्रह्मणः प्राप्त्युपायो वेद एव। वेदश्च ब्रह्मणोऽनुकृतिः, यतस्तस्मादेव ममाहमित्यहङ्कारग्रन्थिसमतिक्रमो जायते । तथा च भर्तृहरिः -

प्राप्त्युपायोऽनुकारश्च तस्य वेदो महर्षिभिः ।

एकोऽप्यनेकवर्त्मेव समाम्नातः पृथक् पृथक् ॥ वाक्यपदीय १/८

तथा च - वेदाभ्यासात् परमान्तरं शुक्लमजरं ज्योतिरस्मिन्नेवापारे तमसि वीते विवर्तते ।

वाक्यपदीय, १/५ स्वोपज्ञवृत्ति ।

अत एवोपनिषत्सु द्वेधा ब्रह्मनिरूपणं कृतम् ।

द्वे वाव ब्रह्मणी अभिधेये शब्दश्चाशब्दश्च । अथ शब्देनैवा-शब्दमाविष्क्रियते। मै. उ.

दर्शनेषु ब्रह्मणः प्राप्तिर्दशधा विकल्पिता । एवं दशसु विकल्पेषु या कापि ब्रह्मप्राप्तिर्भवतु, किन्तु तस्याः प्राप्त्युपायो वेदराशिरेव । वाग्रूपे स्थितो वेदः नित्योऽतीन्द्रियः, सूक्ष्मसंहतक्रमः, स्फोटात्मक एकश्च । अभिव्यक्तिनिमित्तात् क्रमलाभे संहितापदक्रमविभागेन चरणसमाख्या च प्रविभक्तमार्गत्वेन नानात्वम्।

इदं ज्ञानस्वरूपं शब्दब्रह्मैव सर्वजगतो बीजम् । स च परापश्यन्ती-मध्यमावैखरीरूपेण चतुर्धा। तत्र प्राणमयी सूक्ष्मा परावाक् स्वरूपेणैव दुर्बोध्या, सैव तत्त्वं जगदुपादानं च । मनोमयी पश्यन्ती वाक् परावाच एव भेदोऽस्ति । अस्यां क्रमसंहारो वर्तते । स्थूलशब्दब्रह्म एव मध्यमा । मध्यमातो वैखरी वागभिव्यज्यते,

यत्र वागिन्द्रियस्य प्रधानता भवति । इयमेव सक्रमो व्यवहारिकः कार्यशब्द इति कथ्यते । तथा च श्रीमद्भागवते -

शब्दब्रह्म सुदुर्बोधं प्राणेन्द्रियमनोमयं ।
अनन्तपारं गम्भीरं दुर्विगाह्यं समुद्रवत् । श्रीमद्भागवतं १/२१/३६॥

अत्र श्रीधरस्वमी -

तच्च सूक्ष्मं स्थूलं चेति द्विविधं । तत्र सूक्ष्मं तावत् स्वरूपतोऽपि दुर्ज्ञेयं ... प्रथमं प्राणमयं पराख्यम् । ततो मनोमयं पश्यन्त्याख्यम् । तत इन्द्रियमयं मध्यमाख्यम्, तस्य वाग्व्यञ्ज्यकत्वेन वागेन्द्रियप्रधानत्वात् । श्रीधरी १/२१/ ३६ ॥

नित्यशब्द एव सर्वासां जागतिकमूर्तीनां निरवधिप्रकृतिः । न हि तस्मादन्यत् जगतः किमप्युपादानम् । स एव सर्वेश्वरः सर्वशक्तिमान् महावृषभः । वाग्योगस्य ज्ञाता पुरुषोऽहङ्कारग्रन्थीन् विभिद्य भोक्तृभोग्यभोगानां त्रिपुटीं च विच्छिद्य निर्विभागे नित्ये शब्दे लयमेति । अयमेव संवर्तः । संवर्तदशायां शब्दतत्त्वमेवावशिष्यते । इयमेव ब्राह्मीस्थितिः, तां च वाग्योगविदेवाधिगच्छति।

इत्थञ्च व्यावहारिकशब्दस्य मूलकारणे शब्दतत्त्वे अपृथग्भूता नानाशक्तयः सन्ति । तस्मात् सूक्ष्ममूलतत्त्वात् नामरूपातीतादेव जीवस्य जगतश्च प्रसारो भवति, स च शब्दात्मक एव । नामरूपात्मकं प्रसारं प्राप्याप्यद्वैततत्त्वं निर्विकारमेव भवति । इत्थञ्च या वाक् सैव चित् । सैवान्तःस्थितः शब्दात्मा । स च 'ज्ञानस्य शब्दत्वापत्तिरिष्यते', 'अथायमान्तरो ज्ञाता सूक्ष्मवागात्मना स्थितः' 'सैषा संसारिणां संज्ञा' इत्यादिभिश्चोपपादितः ।

अस्य शब्दात्मनः प्रतिबिम्बमादायैव व्यावहारिकः शब्दश्चेतनायते । नित्यशब्दात्मैव परिच्छिन्नं भोगक्षेत्रं प्राप्य जीवत्वमश्नुते । स एव भोक्तृत्वं, भोग्यत्वं, भोगत्वं च प्रतिपद्यते। नादशब्दो, तद्बोध्या अर्थाश्चास्यैव विवर्ताः । अत एव शब्दार्थयोरभेदः । इत्थञ्च वैयाकरणैः सर्वेषु जागतिकपदार्थेष्वेकं निर्विभागं तत्त्वं स्वीकृतं, तच्च शब्दात्मकमिति शम् ।